# पाठ-१७
# कल्पनाकीर्तिः विजयते

**सारान्शः**

अनेके अन्तरिक्षगामिनः वैज्ञानिकाः अन्तरिक्षस्य यात्रां कृतवन्तः । अस्माकं देशात् सर्वप्रथमं राकेशशर्मा अन्तरिक्षं गतः। ततश्च कल्पनाचावला नाम्नी महिला द्विवारम् अन्तरिक्षयात्रां कृतवती ।भारतीयनारीणां गौरवभूता कल्पनाचावला हरियाणाराज्यस्य करनालनगरे 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे मातुः संयोगितायाः पितुः च बनारसीदासस्य गृहे जन्म लब्धवती। सा टैगोरबालनिकतने प्रारम्भिकशिक्षां प्राप्य पंजाबविश्वविद्यालयात् स्नातकोपाधिं प्राप्य 'कालारोडो' विश्वविद्यालये शोधकार्यं कृतवती । तदनन्तरं 'नासा' इति केन्द्रे तस्याः चयनम् अन्तरिक्षयात्रायै जातम्।कल्पनायाः अभिलाषा उद्यमेन दृढनिश्चयेन च पूर्णा जाता। सा द्विवारम् अन्तरिक्षं गता किन्तु द्वितीयायां यात्रायां तस्याः यानं दुर्घटनाग्रस्तं जातम् । यानस्य सदस्याः कैंसररोगस्य विषये अन्येषु च विषयेषु सामग्रीसंचयनं कृतवन्तः । सर्वे सदस्याः पंचत्वं गताः । अस्माकं प्रधानमन्त्री 'इसरो केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पनाचावला प्रथमः' इति उद्घोषितवान्। शुक्लेन कर्मणा जीवतः नरस्य इहलोकः परलोकः च धन्यौ। दुष्कर्मणा दीर्घायुषा किम् ?

**मुख्य बिन्दवः**

संस्कृतभाषायाः प्रचार-प्रसारार्थं सततं निरतानां श्री शङ्करलाल शास्त्रिणां जन्म राजस्थान प्रान्तस्य सीकरमण्डलस्य किशोरपुराग्रामे श्रीमतां पं. श्री लक्ष्मीनारायणशर्मणां गृहे समजायत अमीभिः प्रणीताः ग्रन्थाः सन्ति- **1**. संस्कृत कवि मञ्जरी (चम्पूकाव्यम्) **2.** संस्कृत-कथा-मन्दाकिनी **3.** कविता-निर्झरी, **4.** राजस्थान के संस्कृत कृतिकार **5.** संस्कृत साहित्य का संक्षिप्त इतिहास **6.** संस्कृत वाङ्मय में पर्यावरण।
अयम् राजस्थान संस्कृतानुसन्धान संस्थानात प्रकाशितायाः "सौवर्णी" इत्याख्यायाः शोधपत्रिकायाः संपादकः वर्तते। श्री शास्त्री संप्रति राजस्थान संस्कृतानुसन्धान संस्थाने (शाहपुरोनगरे) निदेशकपदे कार्यरतः अस्ति ।

**अवगच्छामः**

'कल्पना' तु वैमानिकक्षेत्रेऽद्भुतसाहसस्य प्रतीका। सा भारतस्य नारीजातेः च गौरवभूता । तस्याः कीर्तिः अमरा। सत्यमेव कल्पनाकीर्तिर्विजयते। अस्माभिः विविधपुस्तकेभ्यः 'इन्टरनैट' माध्यमेन वा अन्तरिक्षविज्ञानविषयकं ज्ञानम् अर्जनीयम्। कल्पनाचावला सदृशी महिला सुनीताविलियम अपि अस्मिन् क्षेत्रे प्रसिद्धिं प्राप्तवती। सा अन्तरिक्षयात्रां कृत्वा सकुशलं प्रत्यागच्छत् । राष्ट्रगौरव ञ्चावर्धयत्।

**आवश्यकोऽयं ज्ञानम्**

काव्यशास्त्रदृष्ट्या भाषा भावपूर्णा प्रसादगुणोपेता वैदर्भीरीतियुता स्यात् ।
भावप्रधानोऽयं निबन्धः सरस-सुगम-प्राञ्जल भाषया निबद्धः ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ।।
**अर्थात्**- सन्निकृष्टार्थे (समीपार्थे) = 'इदम्' प्रयुज्यते ।
-समीपतरार्थ 'एतद्' प्रयुज्यते
- विप्रकृष्टार्थे (दूरार्थे) – 'अदस्' प्रयुज्यते ।
परोक्षे- 'तद्' प्रयुज्यते ।

**'अधि'** योगे द्वितीया
**'प्रति'** योगे द्वितीया
**'सह'** योगे तृतीया
**'नमः'** योगे चतुर्थी

**शब्दार्थाः**

1. राजते = सुशोभित होता है
2. अभियान्त्रिकी= इन्जीनियरिंग
3. अधिकृत्य = विषय में
4. संजातः = सम्पन्न हुआ
5. सम्यक् पृष्टम् = ठीक पूछा
6. सनाथितम् = साथ
7. भस्मीभूतम् = जल गया
8. उड्डीयमानम् = उड़ रहा था

**योग्यतां वर्धयत**

धन्या हि अस्माकं भारतभूमिः या महद्भिः विभूतिभिः अलङ्कृता । अस्यां धरण्याम् अनेके विद्वांसः, वैज्ञानिकाः चिन्तकाः, कलामर्मज्ञाः, ज्योतिर्विदः जन्म लब्धवन्तः देशं च गौरवान्वितं कृतवन्तः ।
प्राचीनकाले एव आर्यभट्टः वराहमिहिरादयः वैज्ञानिकाः अन्तरिक्षविषये अमूल्यान् सिद्धान्तान् आविष्कृतवन्तः। अद्यत्वे तु उपग्रहयानादीनां साहाय्येन विविधानि शोधकार्याणि प्रचलन्ति । अस्माकं कल्पनाचावला अपि अन्तरिक्षशोधकार्येषु संलग्ना स्वजीवनं व्यतीतवती । तथैव - राकेश शर्मा, सुनीता विलियम्स इत्यादयः अपि च सन्ति ।

**पाठ संप्रेष्यः**

- परिश्रमेण दुर्लभानि कार्याणि अपि सिध्यन्ति ।
- महद्विभूतीनां लक्षणानि बाल्ये एव दृश्यन्ते ।
- नारी अपि पुरुषः इव सबला सफला च ।
- गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वयः ।
- 'प्रति'- 'अधि' योगे द्वितीया, 'सह' योगे तृतीया, 'नमः' योगे चतुर्थी विभक्तिः भवति।
- भूतकालस्य अर्थे क्त-क्तवतु प्रत्यययोः प्रयोगः भवति ।
- इदम्, अदस् सर्वनाम शब्दयोः रूपाणि त्रिषु लिंगेषु भवन्ति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।